लघुसिद्धान्तकौमुदी

समासप्रकरणम्

अव्ययीभावसमासः ०१

समासविधानम्, प्रक्रिया



येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥
नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥



ग्रन्थपठनम्

अथ समासाः

तत्रादौ केवलसमासः । समासः पञ्चधा । तत्र समसनं[1] समासः । स च [2]विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः ॥ १ ॥ प्रायेण [3]पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः ॥ २ ॥ प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः ॥ तत्पुरुषभेदः[4] कर्मधारयः । [5]कर्मधारयभेदो द्विगुः ॥ ३ ॥ प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः ॥ ४ ॥ प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः ॥ ५ ॥

समर्थः पदविधिः २ । १ । १ ॥

[6]पदसंबन्धी यो विधिः स समर्थाश्रितो बोध्यः ॥

प्राक्कडारात्समासः २ । १ । ३ ॥

कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते ॥

सह सुपा २ । १ । ४ ॥

सुप् सुपा सह वा समस्यते ॥ समासत्वात्प्रातिपदिकत्वेन सुपो लुक् । [7]परार्थाभिधानं वृत्तिः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । [8]वृत्त्यर्थविबोधकं वाक्यं विग्रहः ।

स च लौकिकोऽलौकिकश्चेति द्विधा। तत्र पूर्वं भूत इति लौकिकः[1]। 'पूर्वं अम् भूत सु' [2]इत्यलौकिकः। [3]भूतपूर्वः। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः। ([4]इवेन समासो विभक्त्यलोपश्च)। वागर्थौ इव वागर्थाविव ॥

इति केवलसमासः

अभ्यासप्रश्नाः – लेखनम् / विवरणम्

- केवलसमासः केन सूत्रेण विधीयते? सोदाहरणं विवृणुत ।
- “सुपो धातुप्रातिपदिकयोः” – सोदाहरणं व्याख्यात ।
- वृत्तिः नाम का? वृत्तयः कति, ताः काः?
- विग्रहः इत्युक्ते किम्? सः कतिविधः? सोदाहरणं लिखत ।
- भूतपूर्वः – ससूत्रं समासप्रक्रियां प्रदर्शयत ।

अभ्यासप्रश्नाः - अवगमनम्

- सामान्यतः सुबन्तयोः एव समासः - ऋतम् / अनृतम्?
- सामान्यतः समासः द्वयोरेव - ऋतम् / अनृतम्?
- समासस्य प्रातिपदिकसंज्ञा क्रियते – तेन किं प्रयोजनम्?

अस्मिन् पाठे

- अव्ययीभावसमासविधानम्
- अव्ययीभावे समासप्रक्रिया

९१०) अव्ययीभावः॥ २.१.५

- अव्ययीभावः (१.१)
- अधिकारसूत्रम् [२.१.५ – २.१.२१]
- अधिकारोऽयं प्राक् तत्पुरुषात्॥
- “तत्पुरुषः” (२.१.२२)
- २.१.५ – २.१.२१ – अव्ययीभावसमासाधिकारः

९११) अव्ययं विभक्तिसमीप... (२.१.६)

- अव्ययम् (१.१) विभक्ति[1]-समीप[2]-समृद्धि[3]-व्यृद्धि[4]-अर्थाभाव[5]-अत्यय[6]-असंप्रति[7]-शब्दप्रादुर्भाव[8]-पश्चात्[9]-यथा[10]-आनुपूर्व्य[11]-यौगपद्य[12]-सादृश्य[13]-सम्पत्ति[14]-साकल्य[15]-अन्त[16]वचनेषु (७.३) [समासः (१.१), सुप् (१.१), सुपा(३.१), सह(अ०), अव्ययीभावः (१.१)]
- विधिसूत्रम् - अव्ययीभावसमासविधानम्

९११) अव्ययं विभक्तिसमीप... (२.१.६)

- विभक्त्यर्थादिषु वर्तमानम् अव्ययं सुबन्तेन सह नित्यं समस्यते सः अव्ययीभावः ॥

- अव्ययम् – “स्वरादिनिपातमव्ययम्” (१.१.३७) । स्वरादिगणे, चादिगणे च पठिताः शब्दाः, उपसर्गाः, गतिसंज्ञकाः, केचन तद्धितान्ताः कृदन्ताश्च ।

अव्ययीभावः नित्यसमासः

- प्रायेणाविग्रहो नित्यसमासः, प्रायेणास्वपदविग्रहो वा।
- अविग्रहः – यस्य विग्रहः नास्ति ।
  - उदा - कृष्णसर्पः ≠ कृष्णः सर्पः । तीर्थकाकः ≠ तीर्थे काकः ।
  - समासेन अर्थविशेषः (संज्ञा, निन्दा इत्यादि) बोध्यते, यः विग्रहेन बोधयितुं न शक्यः ।

अव्ययीभावः नित्यसमासः

- प्रायेणाविग्रहो नित्यसमासः, प्रायेणास्वपदविग्रहो वा।
- अ-स्वपद-विग्रहः – यस्य अर्थः समास-अघटितैः पदैः बोध्यते ।
  - उदा - उपकृष्णम् = कृष्णस्य समीपम् । निर्विघ्नम् = विघ्नानाम् अभावः
  - समासे एकस्य पदस्य स्वातन्त्र्येण प्रयोगः यत्र न भवति, तदा तस्मिन्नर्थे अन्यत् पदम् उपयुज्यते ।

विभक्त्यर्थे अव्ययीभावः

- सप्तमीविभक्त्यर्थे “अधि” इति अव्ययम् “हरौ” इति सुबन्तेन सह समस्यते
- हरौ इति लौकिकविग्रहः
- हरि ङि अधि इति अलौकिकविग्रहः

हरौ = अधिहरि

- हरि ङि अधि ["अव्ययं विभक्ति..." २.१.५ इति अव्ययीभावसमासः]
- हरि अधि ["सुपो धातुप्रातिपदिकयोः" २.४.७१ इति सुब्लुक्]

९१२) प्रथमानिर्दिष्टं समास उपसर्जनम् (१.२.४३)

- प्रथमा-निर्दिष्टम् (१.१), समासे (७.१), उपसर्जनम् (१.१)
- संज्ञासूत्रम् – उपसर्जनसंज्ञा
- समासशास्त्रे प्रथमानिर्दिष्टम् उपसर्जनसंज्ञं स्यात्॥
- समासशास्त्रम् = समासविधायकं सूत्रम् (वार्त्तिकं वा)

११२) प्रथमानिर्दिष्टं समास उपसर्जनम् (१.२.४३)

- “संख्या वंश्येन” (२.१.१९)
- “तृतीया तत्कृतार्थेन गुणवचनेन” (२.१.३०)
- “अन्नेन व्यञ्जनम्” (२.१.३४)
- “क्तेन अहोरात्रावयवाः” (२.१.४५)

९१२) प्रथमानिर्दिष्टं समास उपसर्जनम् (१.२.४३)

- "संख्या वंश्येन" (२.१.१९)
  - त्रयः मुनयः वंश्याः यस्य – त्रि मुनि
- "तृतीया तत्कृतार्थेन गुणवचनेन" (२.१.३०)
  - शङ्कुलया खण्डः – शङ्कुला खण्ड
- "अन्नेन व्यञ्जनम्" (२.१.३४)
  - दध्ना अन्नम् – दधि अन्न
- "क्तेन अहोरात्रावयवाः" (२.१.४५)
  - पूर्वाह्णे कृतम् – पूर्वाह्ण कृत

११३) उपसर्जनं पूर्वम् (२.२.३०)

- उपसर्जनम् (१.१), पूर्वम् (१.१)
- विधिसूत्रम् – पूर्वनिपातः विधीयते
- समासे उपसर्जनं प्राक्प्रयोज्यम्।
  - दध्ना अन्नम् / अन्नं दध्ना = दध्यन्नम्
  - शङ्कुलया खण्डः / खण्डः शङ्कुलया = शङ्कुलाखण्डः

९१३) उपसर्जनं पूर्वम् (२.२.३०)

- "अव्ययं विभक्ति...ऽन्तवचनेषु [सुपा]"
  - प्रथमानिर्दिष्टत्वात् अव्ययस्य उपसर्जनसंज्ञा
  - हरि अधि – अत्र अधि इति अव्ययम् । अतः तस्य उपसर्जनसंज्ञा
  - अनेन सूत्रेण पूर्वनिपातः

हरौ = अधिहरि

- हरि ङि अधि ["अव्ययं विभक्ति..." २.१.५ इति अव्ययीभावसमासः]
- हरि अधि ["सुपो धातुप्रातिपदिकयोः" २.४.७१ इति सुब्लुक्]
- अधि हरि ["प्रथमानिर्दिष्टम्.." १.२.४३ इति उपसर्जनसंज्ञा, "उपसर्जनं पूर्वम्" २.२.३० इति पूर्वनिपातः]

समासात् सुबुत्पत्तिः

- समासप्रक्रिया
  1. समासविधानम्
  2. समासे कृते "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसंज्ञा
  3. पूर्वोत्तरपदयोः विभक्तिप्रत्ययस्य "सुपो धातुप्रातिपदिकयोः" इति लोपः
  4. पूर्वनिपातः
  5. पूर्व-उत्तरपदयोः विशेषकार्याणि
  6. सन्धिः
  7. समस्तपदात् सुप्प्रत्ययः – सामान्यतः प्रथमाविभक्तौ एकवचनप्रत्ययः (सुँ)

समासात् सुबुत्पत्तिः

- "हरि ङि अधि" इति समासः कृतः । अस्य प्रातिपदिकसंज्ञा भवति
- इदानीं तु "अधिहरि" इत्यस्ति । अस्य प्रातिपदिकसंज्ञा अस्ति वा?
- एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः।
- "एकदेशविकृतम् अनन्यवत्" (परिभाषा)
- छिन्ने पुच्छे श्वा श्वैव, नाश्वो न वा गर्दभः ☺

हरौ = अधिहरि

- हरि ङि अधि [“अव्ययं विभक्ति...” २.१.५ इति अव्ययीभावसमासः]
- हरि अधि [“सुपो धातुप्रातिपदिकयोः” २.४.७१ इति सुब्लुक्]
- अधि हरि [“प्रथमानिर्दिष्टम्..” १.२.४३ इति उपसर्जनसंज्ञा, “उपसर्जनं पूर्वम्” २.२.३० इति पूर्वनिपातः]
- अधिहरि सुँ [“स्वौजस्...” ४.१.२ इति सुप्रत्ययः]

३७२) अव्ययीभावश्च (१.१.४१)

- अव्ययीभावः (१.१), च (अ०), [अव्ययम् (१.१)]
- संज्ञासूत्रम् – अव्ययसंज्ञा
- अव्ययीभावसमासः अव्ययसंज्ञकः भवति ।

३७३) अव्ययादाप्सुपः (२.४.८२)

- अव्ययात् (५.१), आप्-सुपः (६.१), [लुक् (१.१)]
- विधिसूत्रम् – प्रत्ययलोपः
- अव्ययाद् विहितस्य आपः सुपश्च लुक्।
- सर्वाणि अव्ययानि सुबन्तानि । सुप्-प्रत्ययः विधीयते, लुप्यते च ।
- अव्ययीभावश्चेत्यव्ययत्वात्सुपो लुक् ।

हरौ = अधिहरि

- हरि ङि अधि ["अव्ययं विभक्ति..." २.१.५ इति अव्ययीभावसमासः]
- हरि अधि ["सुपो धातुप्रातिपदिकयोः" २.४.७१ इति सुब्लुक्]
- अधि हरि ["उपसर्जनं पूर्वम्" २.२.३० इति पूर्वनिपातः]
- अधिहरि सुँ ["स्वौजस्..." ४.१.२ इति सुप्रत्ययः]
- अधिहरि ["अव्ययादाप्सुपः" (२.४.८२) इति सुप्प्रत्ययस्य लुक्]

सङ्क्षेपः

- ११०) अव्ययीभावः
- १११) अव्ययं विभक्तिसमीप...
- ११२) प्रथमानिर्दिष्टं समास उपसर्जनम्
- ११३) उपसर्जनं पूर्वम्

सङ्क्षेपः

- अव्ययीभावः नित्यसमासः
- सर्वे अव्ययीभावसमासाः अव्ययसंज्ञकाः भवन्ति
- अव्ययात् सुबुत्पत्तिः, लोपश्च
- समासप्रक्रिया – समासविधानम्, प्रातिपदिकसंज्ञा, सुब्लुक्, पूर्वनिपातः, पूर्वोत्तरपदयोः कार्याणि, सन्धिः, सुबुत्पत्तिः

अभ्यासप्रश्नाः – लेखनम् / विवरणम्

- विभक्त्यर्थे अव्ययीभावं ससूत्रं सोदाहरणं विवृणुत ।
- समासे उपसर्जनसंज्ञा केन सूत्रेण भवति? तस्य किं प्रयोजनम्?
- कः नित्यसमासः? सोदाहरणं विवृणुत ।
- सामान्यतः समासप्रक्रियायां के अंशाः भवन्ति? विवृणुत ।
- अधिहरि – प्रक्रियां ससूत्रं लिखत ।

अभ्यासप्रश्नाः - अवगमनम्

- अव्ययीभावे सर्वाणि घटकपदानि अव्ययानि - ऋतम् / अनृतम्?
- अव्ययीभावे समस्तपदम् अव्ययम् - ऋतम् / अनृतम्?
- अव्ययीभावसमासः सामान्यतः अविग्रहः, उत अस्वपदविग्रहः?
- अव्ययसंज्ञायाः प्रधानं प्रयोजनं किम्?

vyoma
॥ वाचं धेनुमुपासीत ॥
Samskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.